श्री दुर्गा मानस पूजा

श्री दुर्गा मानस पूजा

उद्यच्चंदनकुंकुमारुणपयोधाराभिराप्लावितां
नानानर्घ्यमणिप्रवालघटितां दत्तां गृहाणांबिके |
आमृष्टां सुरसुंदरीभिरभितो हस्तांबुजैर्भक्तितो
मातः सुंदरि भक्तकल्पलतिके श्रीपादुकामादरात् || 1 ||

देवेंद्रादिभिरर्चितं सुरगणैरादाय सिंहासनं
चंचत्कांचनसंचयाभिरचितं चारुप्रभाभास्वरम् |
एतच्चंपककेतकीपरिमलं तैलं महानिर्मलं
गंधोद्वर्तनमादरेण तरुणीदत्तं गृहाणांबिके || 2 ||

पश्चाद्देवि गृहाण शंभुगृहिणि श्रीसुंदरि प्रायशो
गंधद्रव्यसमूहनिर्भरतरं धात्रीफलं निर्मलम् |
तत्केशान् परिशोध्य कंकतिकया मंदाकिनीस्रोतसि
स्नात्वा प्रोज्ज्वलगंधकं भवतु हे श्रीसुंदरि त्वन्मुदे || 3 ||

सुराधिपतिकामिनीकरसरोजनालीधृतां
सचंदनसकुंकुमागुरुभरेण विभ्राजिताम् |
महापरिमलोज्ज्वलां सरसशुद्धकस्तूरिकां
गृहाण वरदायिनि त्रिपुरसुंदरि श्रीप्रदे || 4 ||

गंधर्वामरकिन्नरप्रियतमासंतानहस्तांबुज-
-प्रस्तारैर्ध्रियमाणमुत्तमतरं काश्मीरजापिंजरम् |
मातर्भास्वरभानुमंडललसत्कांतिप्रदानोज्ज्वलं
चैतन्निर्मलमातनोतु वसनं श्रीसुंदरि त्वन्मुदम् || 5 ||

स्वर्णाकल्पितकुंडले श्रुतियुगे हस्तांबुजे मुद्रिका
मध्ये सारसना नितंबफलके मंजीरमंघ्रिद्वये |
हारो वक्षसि कंकणौ क्वणरणत्कारौ करद्वंद्वके
विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोन्मदं स्तूयताम् || 6 ||

ग्रीवायां धृतकांतिकांतपटलं ग्रैवेयकं सुंदरं
सिंदूरं विलसल्ललाटफलके सौंदर्यमुद्राधरम् |
राजत्कज्जलमुज्ज्वलोत्पलदलश्रीमोचने लोचने
तद्दिव्यौषधिनिर्मितं रचयतु श्रीशांभवि श्रीप्रदे || 7 ||

अमंदतरमंदरोन्मथितदुग्धसिंधूद्भवं
निशाकरकरोपमं त्रिपुरसुंदरि श्रीप्रदे |
गृहाण मुखमीक्षतुं मुकुरबिंबमाविद्भुमै-
-र्विनिर्मितमघच्छिदे रतिकरांबुजस्थायिनम् || 8 ||

कस्तूरीद्रवचंदनागुरुसुधाधाराभिराप्लावितं
चंचच्चंपकपाटलादिसुरभिद्रव्यैः सुगंधीकृतम् |
देवस्त्रीगणमस्तकस्थितमहारत्नादिकुंभव्रजै-
-रंभःशांभवि संभ्रमेण विमलं दत्तं गृहाणांबिके || 9 ||

कह्लारोत्पलनागकेसरसरोजाख्यावलीमालती-
-मल्लीकैरवकेतकादिकुसुमै रक्ताश्वमारादिभिः |
पुष्पैर्माल्यभरेण वै सुरभिणा नानारसस्रोतसा
ताम्रांभोजनिवासिनीं भगवतीं श्रीचंडिकां पूजये || 10 ||

मांसीगुग्गुलचंदनागुरुरजः कर्पूरशैलेयजै-
-र्माध्वीकैः सह कुंकुमैः सुरचितैः सर्पिर्भिरामिश्रितैः |
सौरभ्यस्थितिमंदिरे मणिमये पात्रे भवेत् प्रीतये
धूपोऽयं सुरकामिनीविरचितः श्रीचंडिके त्वन्मुदे || 11 ||

घृतद्रवपरिस्फुरद्रुचिररत्नयष्ट्यान्वितो
महातिमिरनाशनः सुरनितंबिनीनिर्मितः |
सुवर्णचषकस्थितः सघनसारवर्त्यान्वित-
-स्तव त्रिपुरसुंदरि स्फुरति देवि दीपो मुदे || 12 ||

जातीसौरभनिर्भरं रुचिकरं शाल्योदनं निर्मलं
युक्तं हिंगुमरीचजीरसुरभिर्द्रव्यान्वितैर्व्यंजनैः |
पक्वान्नेन सपायसेन मधुना दध्याज्यसम्मिश्रितं
नैवेद्यं सुरकामिनीविरचितं श्रीचंडिके त्वन्मुदे || 13 ||

लवंगकलिकोज्ज्वलं बहुलनागवल्लीदलं
सजातिफलकोमलं सघनसारपूगीफलम् |
सुधामधुरिमाकुलं रुचिररत्नपात्रस्थितं
गृहाण मुखपंकजे स्फुरितमंब तांबूलकम् || 14 ||

शरत्प्रभवचंद्रमः स्फुरितचंद्रिकासुंदरं
गलत्सुरतरंगिणीललितमौक्तिकाडंबरम् |
गृहाण नवकांचनप्रभवदंडखंडोज्ज्वलं
महात्रिपुरसुंदरि प्रकटमातपत्रं महत् || 15 ||

मातस्त्वन्मुदमातनोतु सुभगस्त्रीभिः सदाऽऽंदोलितं
शुभ्रं चामरमिंदुकुंदसदृशं प्रस्वेददुःखापहम् |
सद्योऽगस्त्यवसिष्ठनारदशुकव्यासादिवाल्मीकिभिः
स्वे चित्ते क्रियमाण एव कुरुतां शर्माणि वेदध्वनिः || 16 ||

स्वर्गांगणे वेणुमृदंगशंख-
-भेरीनिनादैरूपगीयमाना |
कोलाहलैराकलिता तवास्तु
विद्याधरीनृत्यकला सुखाय || 17 ||

देवि भक्तिरसभावितवृत्ते
प्रीयतां यदि कुतोऽपि लभ्यते |
तत्र लौल्यमपि सत्फलमेकं
जन्मकोटिभिरपीह न लभ्यम् || 18 ||

एतैः षोडशभिः पद्यैरुपचारोपकल्पितैः |
यः परां देवतां स्तौति स तेषां फलमाप्नुयात् || 19 ||

इति दुर्गातंत्रे श्री दुर्गा मानस पूजा स्तोत्रम् ||